**(A)**

**Total No. of Questions – 16**
**Total No. of Printed Pages – 4**

**Regd. No.** | | | | | | | | | | |

## Part – II
## SANSKRIT, Paper - II
### (Second Language)

**Time : 3 Hours]** **[Max. Marks : 100**

**Note :** (1) **All** questions should be attempted.

(2) Question Nos. **1, 2 & 3** should be answered in the medium of instruction of the candidate.

(3) The remaining questions should be answered in Sanskrit (Devanagari Script) only.

(4) The bits of a question should be attempted together.

निर्देशः : (1) सर्वे प्रश्नाः समाधेयाः ।

(2-3) प्रथम, द्वितीय, तृतीय प्रश्नान् विहाय अन्ये प्रश्नाः संस्कृतभाषायामेव (देवनागरी लिप्या) समाधेयाः ।

(4) अंशयुक्तस्य प्रश्नस्य अन्तर्गत अंशाः एकत्रैव समाधेयाः ।

I. एकस्य श्लोकस्य प्रतिपदार्थं भावं च लिखत । **1 × 8 = 8**

(अ) दरिद्राणां कृते यस्य हृदयं परितप्यते ।
स महात्मेत्यहं मन्ये तद्विरुद्धो दुरात्मकः ।।

(आ) गुणस्तवेन कुर्वीत महतां मानवर्धनम् ।
हनूमानभवत् स्तुत्या रामकार्यभरक्षमः ।।

II. एकं निबन्धप्रश्नं समाधत्त । **1 × 6 = 6**

(अ) गङ्गा भगीरथस्य पितृदेवतानां पापं कथं धौतवती ?

(आ) हरिश्चन्द्रः स्वस्य सत्यसन्धत्वं कथं अपालयत् ?

III. एकं निबन्धप्रश्नं समाधत्त । **1 × 6 = 6**

(अ) गोपालः कृष्णः कथं गोविन्दः अजायत ?

(आ) दधीचिः दानवीरः कथं अभवत् ?

www.sakshieducation.com

IV. त्रयाणां प्रश्नानां समाधानानि लिखत । $3 \times 2 = 6$

(अ) पितृसद्मगोचरः अपि शिवः कीदृशः ?

(आ) वासुकिना गरुत्मान् किमिति अभिहितः ?

(इ) आत्मनः वनगमनविषये रामः भरतं किमवदत् ?

(ई) चिताभस्मनः रजः अपि केन विशुद्धिमश्नुते ?

(उ) किमर्थं गरुडेन देवलोकात् अमृतवृष्टिः पातिता ?

(ऊ) भरतः कीदृशं रामं द्रष्टुमैच्छत् ?

V. द्वयोः ससन्दर्भं भावं लिखत । $2 \times 3 = 6$

(अ) मनोरथो महानेषः सूतपुत्र ! महारथ !

(आ) किमवान्यत्कलिरेक एव धन्यः ।

(इ) गृहकृत्याय निवृत्यतां लघु ।

(ई) जातस्त्वं भुवि गौतमस्य ।

VI. द्वयोः ससन्दर्भं भावं लिखत । $2 \times 3 = 6$

(अ) यदि कौतूहलम् आकर्ण्यताम् ।

(आ) मनः एव मनुष्याणां कारणं बन्धमोक्षयोः ।

(इ) भवन्तमभिषेक्तुम् आगतं मया ।

(ई) मन्ये इदं मम परमं सौभाग्यम् ।

VII. त्रयाणां प्रश्नानां समाधानानि लिखत । $3 \times 2 = 6$

(अ) भक्तः किमर्थं पुष्पवनम् अगच्छत् ?

(आ) चन्द्रमत्याः हरिश्चन्द्रस्य स्मृतिः कस्मात् आगता ?

(इ) कानि यत्नतः गोप्यानि ?

(ई) कस्मात् युधिष्ठिरः नरकक्लेशं ददर्श ?

(उ) पाण्ड्यराजः खड्गं कथं प्राप्तवान् ?

(ऊ) कस्याः पतनं पृथिवी न सहिष्यति ?

VIII. त्रयाणां प्रश्नानां समाधानानि लिखत । $3 \times 2 = 6$

(अ) मेघानां गुणत्रयं नाम किम् ?

(आ) शूद्रकस्य राजधानी का ?

(इ) सहस्रलोचनः वीरं किमवदत् ?

(ई) चूडाला स्वपतिदेवं किमिति अवदत् ?

(उ) विष्णोः वचनं श्रुत्वा इन्द्रः किमवदत् ?

(ऊ) कदा नरेन्द्रस्य विस्मयः द्विगुणः अजायत ?



www.kseebeducation.com

IX. एकेन वाक्येन समाधानं दत्त । $5 \times 1 = 5$

(अ) सर्वलोक पितामहः कः ?

(आ) मधुरा विजयस्य कर्त्री का ?

(इ) शिशुपालस्य शिरः केन छिन्नम् ?

(ई) सत्यविजयः इत्ययं पाठ्यभागः केन विरचितः ?

(उ) किं मृत्युः उच्यते ?

X. एकेन वाक्येन समाधानं दत्त । $5 \times 1 = 5$

(अ) केन करः प्रेषितः ?

(आ) सिद्धपुरुषः कः ?

(इ) उज्जयिन्याः राजा कः ?

(ई) वृत्रासुरः कस्य भक्तः ?

(उ) शूद्रकस्य नाम किम् ?

XI. अधोनिर्दिष्टकथां पठित्वा प्रश्नानां समाधानं दत्त : $5 \times 1 = 5$

अस्ति कस्मिंश्चित् वने चतुरको नाम जम्बुकः । तेन कदाचिदरण्ये स्वयंमृतः गजः समासादितः । अथ तुष्टः सः तस्य समन्तात् भ्रमति स्म । परं कठिनां तस्य त्वचं दन्तैः भेत्तुम् न शशाक । अत्रान्तरे कोऽपि सिंहः तत्र आजगाम । तं दृष्ट्वा वञ्चकः चतुरकः साष्टाङ्गपातं प्रणिपत्य प्रोवाच ।

''स्वामिन् भवत्पादसेवकोऽहं भवदर्थे गजम् इमं रक्षामि । तदयं भक्ष्यतां स्वामिना'' इति । सिंहः प्राह – ''जम्बुक ! नाहमन्यहतं सत्वं भक्षयामि । तदेव ते मया प्रसादीकृतम् । अतः त्वमेव भक्षय'' इति । तत् श्रुत्वा जम्बुकः सानन्दमाह – ''युक्तमेव स्वामिनो मृगेन्द्रस्य'' इति । अथ सिंहः गतः ।

**प्रश्ना :**

(अ) जम्बुकस्य नाम किम् ?

(आ) जम्बुकेन अरण्ये कः समासादितः ?

(इ) तस्य त्वक् कथमस्ति ?

(ई) तत्र कः आजगाम ?

(उ) सिंहः जम्बुकं प्रति किमाह ?

XII. नामनिर्देशपूर्वकं त्रीणि सन्धत्त । $3 \times 2 = 6$

(अ) रामस् + शेते

(आ) सुप् + अन्तम्

(इ) चक्रिन् + ढौकसे

(ई) जगत् + नाथः

(उ) गुरुः + जयति

(ऊ) वृक्षः + फलति

XIII. नामनिर्देशपूर्वकं त्रीणि विघटयत । $3 \times 2 = 6$

(अ) रामः करोति

(आ) वाङ्महिमा

(इ) नमस्ते

(ई) सज्जनः

(उ) रामष्षष्ठः

(ऊ) वाग्वादः

www.sakshieducation.com

XIV. द्वौ शब्दौ अन्त-लिङ्ग-विभक्ति-वचन-निर्देशपूर्वकं सम्पूर्णतया लिखत । $2 \times 6 = 12$

(अ) राजन्

(आ) गिर्

(इ) मनस्

(ई) यद् – स्त्री

XV. समासनाम निर्देशपूर्वकं त्रीणि विग्रहवाक्यानि लिखत । $3 \times 2 = 6$

(अ) महाबलः

(आ) सुखदुःखम्

(इ) वज्रकठोरम्

(ई) ग्रामगतः

(उ) उपकृष्णम्

(ऊ) त्रिभुवनम्

XVI. अधोरेखाङ्कित पदं शुद्धीकृत्य शुद्धं वाक्यं लिखत । $5 \times 1 = 5$

(अ) त्वं कार्यालये तिष्ठथः ।

(आ) एते भयेन धावति

(इ) वृक्षात् फलम् अपतन् ।

(ई) अहं पाठान् पठावः ।

(उ) बालः गृहाणि अगच्छन् ।

---